क्षीरपेया च पेयात्र सघृतान्वासनं घृतम् ।
मधुरैः साधितं शुद्ध्यै पुराणशकृतस्तथा ॥
शुष्कमूलककोलाम्लकषायेण प्रशस्यते ।
शताह्वाकल्कितो वस्तिः स तैलघृतसैन्धवः ॥
तस्मिन्नेकाहयातेऽपि कालः सूतेरतः परम् ।
वर्षादिकारकारी स्यात् कुक्षौ वातेन धारितः ॥
शस्तश्च नवमे मासि स्निग्धो मांसरसौदनः ।
बहुस्नेहा यवागूर्वा पूर्वोक्तश्चानुवासनम् ॥
तत एव पिचुञ्चास्या योनौ नित्यं निधापयेत् ।
वातघ्नपत्रभङ्गाम्भः शीतं स्नानेऽन्वहं हितम् ॥
निःस्नेहाङ्गी न नवमान्मासात् प्रभृति वासयेत् ।
प्रागुदक्षिणजस्तन्या पूर्वं तत् पार्श्वचेष्टिनी ॥
पुन्नामदौहृदप्रश्नरता पुंस्वप्नदर्शिनी ।
उन्नते दक्षिणे कुक्षौ गर्भे च परिमण्डले ॥
पुत्रं सूतेऽन्यथा कन्यां या चेच्छति नृसङ्गतिम् ।
नृत्यवादित्रगान्धर्व्व-गन्धमाल्यप्रिया च या ॥
क्लीबं तत् सङ्करे तत्र मध्यं कुक्षेः समुन्नतम् ।
यमौ पार्श्वद्वयोन्नामात् कुक्षौ द्रोण्यामिव स्थिते ॥
प्राक् चैव नवमान्मासात् सूतिकागृहमाश्रयेत् ।
देशे प्रशस्ते सम्भारैः सम्पन्नं साधकेऽहनि ॥
तत्रोदीक्षेत सा सूतिं सूतिका परिवारिता ।
अद्य श्वः प्रसवे ग्लानिः कुक्ष्यक्षिश्लथताक्लमः ॥
अधो गुरुत्वमरुचिः प्रसेको बहुमूत्रता ।
वेदनोरूदरकटीपृष्ठहृद्बस्तिवङ्क्षणे ॥
योनिभेदरुजातोदस्फुरणस्रवणानि च ।
आवीनामनुजन्मातस्ततो गर्भोदकस्रुतिः ॥
अथोपस्थितगर्भां तां कृतकौतुकमङ्गलाम् ।
हस्तस्थपुन्नामफलां स्वभ्यक्तोष्णाम्बुसेचिताम् ॥
पाययेत् सघृतां पेयां तनौ भूशयने स्थिताम् ।
आभुग्नसक्थिमुत्तानामभ्यक्ताङ्गीं पुनः पुनः ॥
अधोनाभेर्विमृद्नीयात् कारयेज्जृम्भचङ्क्रमम् ।
गर्भः प्रयात्यवागेवं तल्लिङ्गं हृद्विमोक्षतः ॥
आविश्य जठरं गर्भो बस्तेरुपरि तिष्ठति ।
आवी हि त्वरयन्त्येनां खट्वामारोपयेत्ततः ॥
अथ सम्पीडिते गर्भे योनिमस्याः प्रसारयेत् ।
मन्दपूर्व्वं प्रवाहेत बाढमाप्रसवाच्च सा ॥
हर्षयेत्तां मुहुः पुत्रजन्मशब्दजलानिलैः ।
प्रत्यायान्ति तथा प्राणाः सूतिक्लेशावसादिताः ॥
धूपयेद्गर्भसङ्गे तु योनिं कृष्णाहिकञ्चुकैः ।
हिरण्यपुष्पीमूलञ्च पाणिपादेन धारयेत् ॥
सुवर्च्चलां विशल्यं वा जरायुपतनेऽपि च ।
कार्य्यमेतत् तथोत्क्षिप्य बालोरेणा विकम्पयेत् ॥
कटीमाकोटयेत् पार्ष्ण्या स्फिचौ गाढं निपी-
डयेत् ।
तालुकण्ठं स्पृशेदस्या मूर्द्ध्नि दद्यात् स्नुहीपयः ॥
भूर्ज्जलाङ्गलिकीतुम्बी सर्पत्वक्कुष्ठसर्षपैः ।
पृथग् द्वाभ्यां समस्तैर्वा योनिलेपनधूपनम् ॥
कुष्ठतालीशकल्कं वा सुरामण्डेन पाययेत् ।
यूषेण वा कुलत्थानां बिल्वेनालवणेन वा ॥
शताह्वासर्षपाजाजीशिग्रुतीक्ष्णकचित्रकैः ।
सहिङ्गुकुष्ठमदनैर्मूत्रे क्षीरे च साधितम् ॥
तैलं सिद्धं हितं पायौ योन्यां वाप्यनुवासनम् ।
शतपुष्पा वचाकुष्ठकणासर्षपकल्कितः ॥
निरूहः पातयत्याशु सस्नेहलवणोऽपराम् ।
तत्सङ्गे ह्यनिलो हेतुः सा निर्य्यात्याशु तज्जयात् ॥
कुशला पाणिनाक्तेन हरेत् कृत्तनखेन वा ।
मुक्तगर्भां परां योनिं तैलेनाक्ताञ्च मर्द्दयेत् ॥
मक्कल्लाख्ये शिरोबस्ति कोष्ठशूले तु पाययेत् ।
सचूर्णितं यवक्षारं घृतेनोष्णजलेन वा ॥
धान्याम्बु वा गुडव्योषत्रिजातकरजोऽन्वितम् ॥”
इति वाभटे शरीरस्थाने प्रथमोऽध्यायः ॥ * ॥

अथ गर्भोपचारः ।

आत्रेय उवाच ।

“प्रथमे मासि मधुकं मधुपुष्पाणि चैव हि ।
नवनीतेन पयसा मधुरं पाययेच्च वा ॥
द्वितीये मासि काकोलीं मधुरं पाययेत्तथा ।
तृतीये कृशरं श्रेष्ठं चतुर्थे च कृतौदनम् ॥
पञ्चमे पायसं दद्यात् षष्ठे च मधुरं दधि ।
सप्तमे घृतखण्डेन चाष्टमे घृतपूरकम् ॥
नवमे विविधान्नानि दशमे दोहदन्तथा ।
मासे तृतीये सम्प्राप्ते दोहदं भवति स्त्रियाः ॥
यद्यत् कामयते सा च तत्तद्दद्याद्भिषग्वरः ।
वर्ज्जयेद्द्विदलान्नानि विदाहीनि गुरूणि च ॥
अम्लानि सोष्णक्षीराणि गुर्व्विणीनां विवर्ज्जयेत् ।
मृत्तिका भक्षणीया न न च सूरणकन्दकाः ॥
रसोनञ्च पलाण्डुञ्च सन्त्यक्तो गुर्व्विणीस्त्रिया ।
सूरणानि प्रदेयानि गौल्यानि सरसानि च ॥
पथ्ये हितानि चैतानि गुर्व्विणीनां सदा भिषक् ।
आयासं मैथुनं रोषं शोकं चाक्रमणन्तथा ॥
वर्ज्जयेद्गुर्व्विणीनाञ्च जायन्ते सुखसम्पदः ॥

अथोपपन्नं विहितमपि स्त्रीयाचारेण पञ्च-मासिकमष्टमासिकं वा । माङ्गल्यमङ्गलादिभिर्गर्भभोजनमपि कर्त्तव्यम् । दोहदादिषु परिपूर्णेषु रूपवान् शूरः पण्डितः शीलवान् पुत्रो जायते ।” इति महर्ष्यात्रेयभाषिते हारीतोत्तरे तृतीयस्थाने गर्भोपचारो नाम षट्चत्वारिंशोऽध्यायः ॥ * ॥

अथ चलितगर्भचिकित्सा ।

आत्रेय उवाच ।

“प्रथमे मासि गर्भस्य चलनं दृश्यते यदि ।
तदा मधुकन्दहीका चन्दनं रक्तचन्दनम् ॥
पयसा लोडितं पीतं तेन गर्भः स्थिरो भवेत् ।
द्वितीये मासि चलिते न्यग्रोधे नागकेशरम् ॥
तृतीये मासि गर्भस्य चलनं दृश्यते यदा ।
तदा मधुककोकिलान्तु शर्करां पयसा पिबेत् ॥
चतुर्थे मासि दाहश्च पिपासा शूलमेव च ॥
ज्वरेण स्त्रीणां यदि गर्भश्चलति तदोशीरचन्दननागकेशरधातकीकुसुमशर्करामधुदधि पाययेत् । पञ्चमे मासे चलिते गर्भे दाडिमीपत्राणि चन्दनं दधि मधु च पाययेत् । षष्ठे मासि गैरिकं दग्धमृत्तिकां गोमयभस्म उदकं परिस्रुतं शीतलं चन्दनं शर्करया सह पिबेत् । सप्तमे मासि गोक्षुरसमङ्गापद्मकपञ्चसुशीरं मधुरं पाययेत् । अष्टमे मासि रोध्रं मधुमागधिकाच सह दुग्धेन पीतवतीनाञ्चलिते गर्भे स्त्रीणां सुखं सम्पद्यते ।” इति महर्ष्यात्रेयभाषिते हारीतोत्तरे तृतीये स्थाने चलितगर्भचिकित्सा नामैकपञ्चाशत्तमोऽध्यायः ॥ * ॥

“नरो धातुबलेनापि जीवितश्चात्र दृश्यते ।
तस्माच्च मैथुनात् सम्यग्जायते गर्भसम्भवः ॥

हारीत उवाच ।

संयोगेन विना प्राज्ञ ! कथं गर्भो न जायते ।
संयोगेन विना पुष्पं फलं वा न कथं भवेत् ॥
इत्येवन्न कथं स्त्रीणां फलोत्पत्तिः प्रदृश्यते ।
एतत् पृष्टो महाचार्य्यः प्रोवाच ऋषिपुङ्गवः ॥

आत्रेय उवाच ।

विरुद्धानाञ्च वल्लीनां स्थावराणाञ्च पुत्रक ! ।
तत्र धातुसमं बीजं सह योगेन वर्त्तते ॥
न भिन्नदृष्टिस्तस्यैव दृश्यते शृणु पुत्रक ! ।
स्थावराणाञ्च सर्व्वेषां शिवशक्तिमयं विदुः ॥
निश्चलोऽपि शिवो ज्ञेयो वाग्निशक्तिर्मिलामते ! ।
तत्र स्त्रीपुरुषगुणा वर्त्तन्ते समयोगतः ॥
आम्रपुष्पं फलं तद्वत् बीजं शुक्रमयं विदुः ।
स्त्रीणां रजोमयं रेतो बीजाढ्यमिन्द्रियं नरे ॥
तस्मात् संयोगतः पुत्रो जायते गर्भसम्भवः ।
प्रथमेऽहनि रेतश्च संयोगात् कललञ्च यत् ॥
जायते बुद्बुदाकारं शोणितञ्च दशाहनि ।
घनं पञ्चदशाहे स्यात् विंशाहे मांसपिण्डकम् ॥
मासेकेन च पिण्डस्य पञ्च तत्त्वं प्रजायते ।
पञ्चाशद्दिवसे प्राप्ते अङ्कुराणाञ्च सम्भवः ॥
मासद्वये तु सम्प्राप्ते हस्तपादौ प्रवर्त्तितौ ।
बाहुमासत्रये प्राप्ते शिरश्च सारपञ्जरेत् ॥
चतुर्थके च लोमानां सम्भवश्चात्र दृश्यते ।
पञ्चमे च सजीवः स्यात् षष्ठे प्रस्फुरणं भवेत् ॥
अष्टमे मासि याते च चर्म्मयोगः प्रवर्त्तते ।
मासे तु नवमे प्राप्ते जायते तस्य चेष्टितम् ॥
जायते तस्य वैराग्यं गर्भवासस्य कारणात् ।
दशमे च प्रसूयेत तथैकादशमासि वा ॥
अथ दोषवशेनापि गर्भो यापि प्रसूयते ।
वातसंप्रेरिते गर्भे अपूर्णे दिवसे यदि ॥
प्रसूतये चाप्यथ तद्गर्भे बालः प्रदृश्यते ॥”

इति हारीते शारीरस्थाने प्रथमोऽध्यायः ॥ * ॥)

शिशुः । (गीर्य्यते निगीर्य्यते निःक्षिप्यते वीर्य्यं योनिरन्ध्रे यस्मिन् । गिरति क्षिपति निषेकं करोति रेतोऽत्र वा । गॄ ए वा + भन् ।) कुक्षिः । (यथा, महाभारते । १४ । १८ । ६ ।
“यथा लोहस्य निस्यन्दो निषिक्तो बिम्बविग्रहम् ।
उपैति तद्विजानीहि गर्भे जीवप्रवेशनम् ॥”)
सन्धिः । पनसकण्टकम् । इति मेदिनी ॥ भे । ३
मध्यम् । (यथा, आर्य्यासप्तशत्याम् । १७६ ।
“कैतकगर्भे गन्धादरेण दूरादमी द्रुतमुपेताः ॥”)
अपवरकः । इति हेमचन्द्रः ॥ गङ्गादिसन्निहित-देशः । यथा,—
“भाद्रशुक्लचतुर्दश्यां यावदाक्रमते जलम् ।
तावद्गर्भं विजानीयात् तदूर्द्ध्वं तीरमुच्यते ॥”
इति प्रायश्चित्ततत्त्वम् ॥